## ॥ श्रीरुद्रप्रश्नः ॥

ओं नम॑स्ते रुद्र म॒न्यव॑ उ॒तोत॒ इष॑वे॒ नम॑: । नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नम॑: । या त॒ इषु॑: शि॒वत॑मा शि॒वं ब॒भूव॑ ते॒ धनु॑: । शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय । या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी । तया॑ नस्त॒नुवा॒ शन्त॑मया॒ गिरि॑शंता॒भिचा॑कशीहि । यामिषुं॑ गिरिशं॒त हस्ते᳚ । बिभ॒र्ष्यस्त॑वे । शि॒वां गि॑रित्र॒ तां कु॑रु॒ मा हि॑ꣳसी॒: पुरु॑षं॒ जग॑त् । शि॒वेन॒ वच॑सा त्वा॒ गिरि॒शाच्छा॑वदामसि । यथा॑ न॒: सर्व॒मिज्जग॑द॒यक्ष्मꣳ सु॒मना॒ अस॑त् । अध्य॑वोचदधिव॒क्ता प्र॑थ॒मो दैव्यो॑ भि॒षक् । अहीग्॑श्च॒ सर्वा᳚ञ्ज॒म्भय॒न्त्सर्वा᳚श्च यातुधा॒न्य॑: । अ॒सौ यस्ता॒म्रो अ॑रु॒ण उ॒त ब॒भ्रुः सु॑म॒ङ्गल॑: । ये चे॒माꣳ रु॒द्रा अ॒भितो॑ दि॒क्षु । श्रि॒ताः स॑हस्र॒शोऽवै॑षा॒ꣳ हेड॑ ईमहे । अ॒सौ यो॑ऽव॒सर्प॑ति॒ नील॑ग्रीवो॒ विलो॑हितः । उ॒तैनं॑ गो॒पा अ॑दृश॒न्नदृ॑शन्नुदहा॒र्य॑: । उ॒तैनं॒ विश्वा॑ भू॒तानि॒ स दृ॒ष्टो मृ॑डयाति नः । नमो॑ अस्तु॒ नील॑ग्रीवाय सहस्रा॒क्षाय॑ मी॒ढुषे᳚ । अथो॒ ये अ॑स्य॒ सत्त्वा॑नो॒ऽहं तेभ्यो॑ऽकर॒न्नम॑: । प्रमु॑ञ्च॒ धन्व॑न॒स्त्वमु॒भयो॒रार्त्नि॑यो॒र्ज्याम् । याश्च॑ ते॒ हस्त॒ इष॑वः परा॒ ता भ॑गवो वप । अ॒व॒तत्य॒ धनु॒स्त्वꣳ सह॑स्राक्ष॒ शते॑षुधे । नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑ शि॒वो न॑: सु॒मना॑ भव । विज्यं॒ धनु॑: कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाꣳ उ॒त । अने॑शन्न॒स्येष॑व आ॒भुर॑स्य निषं॒गथि॑: । या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनु॑: । तया॒ऽस्मान् वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ब्भुज । नम॑स्ते अ॒स्त्वायु॑धा॒याना॑तताय धृ॒ष्णवे᳚ । उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्यां॒ तव॒ धन्व॑ने । परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु वि॒श्वत॑: । अथो॒ य इ॑षु॒धिस्तवा॒रे अ॒स्मन्निधे॑हि॒ तम् ॥ १ ॥

# || Śrīrudrapraśnaḥ ||

oṁ namaste rudra manyava utota iṣave namaḥ | namaste astu dhanvane bāhubhyāmuta te namaḥ | yā ta iṣuḥ śivatamā śivaṁ babhūva te dhanuḥ | śivā śaravyā yā tava tayā no rudra mṛḍaya | yā te rudra śivā tanūraghorā’pāpakāśinī | tayā nastanuvā śantamayā giriśaṁtābhicākaśīhi | yāmiṣuṁ giriśaṁta haste | bibharṣyastave | śivāṁ giritra tāṁ kuru mā higṁsīḥ puruṣaṁ jagat | śivena vacasā tvā giriśācchāvadāmasi | yathā naḥ sarvamijjagadayakṣmagṁsumanā asat | adhyavocadadhivaktā prathamo daivyo bhiṣak | ahīgśca sarvāñjambhayantsarvāśca yātudhānyaḥ | asau yastāmro aruṇa uta babhruḥ sumaṅgalaḥ | ye cemāgṁrudrā abhito dikṣu | śritāḥ sahasraśo’vaiśāgṁheḍa īmahe | asau yo’vasarpati nīlagrīvo vilohitaḥ | utainaṁ gopā adṛśannadṛśannudahāryaḥ | utainaṁ viśvā bhūtāni sa dṛṣṭo mṛḍayāti naḥ | namo astu nīlagrīvāya sahasrākṣāya mīḍhuṣe | atho ye asya sattvāno’haṁ tebhyo’karannamaḥ | pramuñca dhanvanastvamubhayorārtniyorjyām | yāśca te hasta iṣavaḥ parā tā bhagavo vapa | avatatya dhanustvagṁsahasrākṣa śateṣudhe | niśīrya śalyānāṁ mukhā śivo naḥ sumanā bhava | vijyaṁ dhanuḥ kapardino viśalyo bāṇavāgṁ uta | aneśannasyeṣava ābhurasya niṣaṁgathiḥ | yā te hetirmīḍhuṣṭama haste babhūva te dhanuḥ | tayā’smān viśvatastvamayakṣmayā paribbhuja | namaste astvāyudhāyānātatāya dhṛṣṇave | ubhābhyāmuta te namo bāhubhyāṁ tava dhanvane | pari te dhanvano hetirasmānvṛṇaktu viśvataḥ | atho ya iṣudhistavāre asmannidhehi tam || 1 ||

नम॑स्ते अस्तु भगवन्विश्वेश्वराय॑ महादे॒वाय॑ त्र्यम्ब॒काय॑ त्रिपुरान्त॒काय॑ त्रिकाग्निका॒लाय॑ कालाग्निरु॒द्राय॑ नीलक॒ण्ठाय॑ मृत्युञ्ज॒याय॑ सर्वेश्व॒राय॑ सदाशि॒वाय॑ श्रीमन्महादे॒वाय॒ नम॑: ॥

नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमो॒ नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्य: पशू॒नां पत॑ये॒ नमो॒ नम॑: स॒स्पिञ्ज॑राय॒ त्विषी॑मते पथी॒नां पत॑ये॒ नमो॒ नमो॑ बभ्लु॒शाय॑ विव्या॒धिनेऽन्ना॑नां॒ पत॑ये॒ नमो॒ नमो॒ हरि॑केशायोपवी॒तिने॑ पु॒ष्टानां॒ पत॑ये॒ नमो॒ नमो॑ भ॒वस्य॑ हे॒त्यै जग॑तां॒ पत॑ये॒ नमो॒ नमो॑ रु॒द्राया॑तता॒विने॒ क्षेत्रा॑णां॒ पत॑ये॒ नमो॒ नम॑: सू॒तायाह॑न्त्याय॒ वना॑नां॒ पत॑ये॒ नमो॒ नम॑: । रोहि॑ताय स्थ॒पत॑ये वृ॒क्षाणां॒ पत॑ये॒ नमो॒ नमो॑ म॒न्त्रिणे॑ वाणि॒जाय॒ कक्षा॑णां॒ पत॑ये॒ नमो॒ नमो॑ भु॒वंतये॑ वारिवस्कृ॒तायौष॑धीनां॒ पत॑ये॒ नमो॒ नम॑ उ॒च्चैर्घो॑षायाक्र॒न्दय॑ते पत्ती॒नां पत॑ये॒ नमो॒ नम॑: कृत्स्नवी॒ताय॒ धाव॑ते॒ सत्त्व॑नां॒ पत॑ये॒ नम॑: ॥ २ ॥

नम॒: सह॑मानाय निव्या॒धिन॑ आव्या॒धिनी॑नां॒ पत॑ये॒ नमो॒ नम॑: ककु॒भाय॑ निष॒ङ्गिणे॑ स्ते॒नानां॒ पत॑ये॒ नमो॒ नमो॑ निष॒ङ्गिण॑ इषुधि॒मते॒ तस्क॑राणां॒ पत॑ये॒ नमो॒ नमो॒ वञ्च॑ते परि॒वञ्च॑ते स्तायू॒नां पत॑ये॒ नमो॒ नमो॑ निचे॒रवे॑ परिच॒रायार॑ण्यानां॒ पत॑ये॒ नमो॒ नम॑: सृका॒विभ्यो॒ जिघा॑ꣳसद्भ्यो मुष्ण॒तां पत॑ये॒ नमो॒ नमो॑ऽसि॒मद्भ्यो॒ नक्तं॒चर॑द्भ्य: प्रकृ॒न्तानां॒ पत॑ये॒ नमो॒ नम॑ उष्णी॒षिणे॑ गिरिच॒राय॑ कुलु॒ञ्चानां॒ पत॑ये॒ नमो॒ नम॑: । इषु॑मद्भ्यो धन्वा॒विभ्य॑श्च वो॒ नमो॒ नम॑ आतन्वा॒नेभ्य॑: प्रति॒दधा॑नेभ्यश्च वो॒ नमो॒ नम॑ आ॒यच्छ॑द्भ्यो विसृ॒जद्भ्य॑श्च वो॒ नमो॒ नमोऽस्य॑द्भ्यो विध्य॑द्भ्यश्च वो॒ नमो॒ नम॒ आसी॑नेभ्य॒: शया॑नेभ्यश्च वो॒ नमो॒ नम॑: स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नमो॒ नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नमो॒ नम॑: स॒भाभ्य॑: स॒भाप॑तिभ्यश्च वो॒ नमो॒ नमो॒ अश्वे॒भ्योऽश्व॑पतिभ्यश्च वो॒ नम॑: ॥ ३ ॥

namaste astu bhagavanviśveśvarāya mahādevāya tryambakāya tripurāntakāya trikāgnikālāya kālāgnirudrāya nīlakaṇṭhāya mṛtyuñjayāya sarveśvarāya sadāśivāya śrīmanmahādevāya namaḥ ||

namo hiraṇyabāhave senānye diśāṁ ca pataye namo namo vṛkṣebhyo harikeśebhyaḥ paśūnāṁ pataye namo namaḥ saspiñjarāya tviṣīmate pathīnāṁ pataye namo namo babhluśāya vivyādhine'nnānāṁ pataye namo namo harikeśāyopavītine puṣṭānāṁ pataye namo namo bhavasya hetyai jagatāṁ pataye namo namo rudrāyātatāvine kṣetrāṇāṁ pataye namo namaḥ sūtāyāhantyāya vanānāṁ pataye namo namaḥ | rohitāya sthapataye vṛkṣāṇāṁ pataye namo namo mantriṇe vāṇijāya kakṣāṇāṁ pataye namo namo bhuvaṁtaye vārivaskṛtāyauṣadhīnāṁ pataye namo nama uccairghoṣāyākrandayate pattīnāṁ pataye namo namaḥ kṛtsnavītāya dhāvate sattvanāṁ pataye namaḥ || 2 ||

namaḥ sahamānāya nivyādhina āvyādhinīnāṁ pataye namo namaḥ kakubhāya niṣaṅgiṇe stenānāṁ pataye namo namo niṣaṅgiṇa iṣudhimate taskarāṇāṁ pataye namo namo vañcate parivañcate stāyūnāṁ pataye namo namo nicerave paricarāyāraṇyānāṁ pataye namo namaḥ sṛkāvibhyo jighāgṁsadbhyo muṣṇatāṁ pataye namo namo'simadbhyo naktaṁcaradbhyaḥ prakṛntānāṁ pataye namo nama uṣṇīṣiṇe giricarāya kuluñcānāṁ pataye namo namaḥ | iṣumadbhyo dhanvāvibhyaśca vo namo nama ātanvānebhyaḥ pratidadhānebhyaśca vo namo nama āyacchadbhyo visṛjadbhyaśca vo namo namo'syadbhyo vidhyadbhyaśca vo namo nama āsīnebhyaḥ śayānebhyaśca vo namo namaḥ svapadbhyo jāgradbhyaśca vo namo namastiṣṭhadbhyo dhāvadbhyaśca vo namo namaḥ sabhābhyaḥ sabhāpatibhyaśca vo namo namo aśvebhyo'śvapatibhyaśca vo namaḥ || 3 ||